॥श्रीगणेशायनमः॥सामान्येनातिदेशोयोनुमानात्सनिरूपितः।विशेषेणातिदेशोयः सोष्टमेथनिरूप्यते।
अनेनसप्तमं अष्टमयोरध्याययोः पूर्वोत्तरभावउपपादितः।सप्तमस्यचतुर्थपादेद्वितीयाधिकरणे नानुमानि
कवाक्यकृतो तिदेशोस्तीतिसप्तमाध्यायं निरूपितं।अष्टमेउतद्विशेषानिरूप्यंते॥अष्टम प्रथमे प्रथमाधि॥कस्मा
च्चिदतिदिश्यंतेनियतात्कर्मणोथवाविशेषादाहोस्वित्सर्वस्मात्कर्मणः।विहितेनिकर्तव्यतारहितेसोर्या
दौकर्मणितद्धर्मकायतःकृतश्चित्कर्मणोधर्मातिदिश्यंते।ऊतोनियामकस्यविशेषस्याभावादतोविशेषचिंतानका
र्यतिचेत्।मैवं।शास्त्रार्थस्यव्यवस्थायानियामकत्वात्।तस्मान्नियतादेकस्माच्चकर्मणोतिदेशस्तेनविशेषचिंताक
र्तव्या।द्वितीय॥तद्धितोक्तादिलिंगंकिंनविशेषनियामकं।भवेद्धानह्यशब्दत्वाद्वेच्छब्देप्रवेशतः॥दर्शपूर्णमासयो
राग्नेयमष्टाकपालंनिर्वपतीत्येतद्धितोक्तादेवतानिर्देशः एकदेवतायोगि त्वमोघद्रव्यकत्वंनिर्वापइत्येतानेन्या
यागसंबंधितयाप्रमाणत्वादाग्नेयलिंगानिसोर्यंचरुंनिर्वपेदित्यत्रोक्तान्फलभ्यंतेनैषामाग्नेय धर्मातिदे
शंनियंतुंसामर्थ्यमस्तिकुतःनैषामशब्दरूपत्वेनशब्दैकसमधिगम्यैषांप्रमाणयोगादितिप्राग्वदुक्तः।लिंगस्या
रितोपकारसहितमेवसोर्ययागंतच्छब्दोविदधातितथासतिप्रधानस्यलिंगस्यशब्देप्रवेशादाग्नेयवत्सोर्योनुष्ठे

द्वितीयवार्तिकमारभ्यते॥४

यइत्येतादृशंचोदकवाक्यमनुमाप यत्रालिंगेनधर्मविशेषानियम्यंते॥तृतीय।विधंतऐष्टिकःसोमेस्यान्नोवास्यात्स
इतिनः।उपरिष्टैर्नैरपत्त्वाद्विधंतोनैष्टिकोत्रहिऐष्टिकोविधंतः प्रयाजादिःसवसोमांगभूतेदीक्षणीयादोपहन्नत्वा
त्सोमेणनिवार्यइतिचेत्।मैवं।प्रत्यक्षोपरिष्टैरभिषवाद्यंगकला सोमस्यनिराकांक्षत्वात्।तस्मा ष्टिकोविधं
नः॥ ॥४॥इष्ट्याग्नेयोत्रसोमानांमूलप्रकृतिनानहि।अस्तिवानालौकिकत्वादियत्रानवधारणात्।लोकवत्सन्नि
त्याराद्उपकारिद्रव्यश्रुतेःइयत्रायानिश्चितत्वान्मूलप्रकृतिताविषु।अलौकिकत्वेनेतावद्विरोधेःसंपूर्णउपकारइति
निश्चेतुमशक्यत्वादिष्टादीनांनास्तिमूलप्रकृतित्वमितिचेत्।मैवं।लौकसदृशत्वात्ययथालोकेसुजिक्रियायामो
दनःकरणंतस्यसन्निपत्योपकारिणःशाकसूपादयस्त्रारादुपकारिणः पीठप्रदीपादयः।तथाभावनायांयागःक
रणंश्रवणादयःसन्निपत्योपकारिणः प्रयाजादयस्त्रारादुपकारिणः।अतोनात्यंतमलौकिकत्वंइयत्रालौकिकेयथाप्र
त्यक्षेणनिश्चीयतेनथाश्रौतेश्रुत्यानिश्चीयतेतस्मादिष्टयग्निहोत्रसोमानांमूलप्रकृतित्वमस्ति॥चतुर्थी।ऐंद्राग्नोदो
सोमिकःस्यादेष्टिकोवाद्वयोरिह।संभवादेष्टिकोत्रोक्तःस्यात्कपालादिलिंगतः।ऐंद्राग्नमेकादशकपालंनिर्वपेत्य
जाकामइत्यादौसोमिकेष्टिकपोर्विधंतयोरन्यतरइछयाग्राह्यः।कुतः।उभयत्रविधंतसंभवेनानिर्देशमर्

त्वादितिचेत्।नाकपालनिर्वापादिभिर्लिंगविशेषैरैष्टिकस्येवात्रोवितत्वात्॥पंचमं॥नपशावैष्टिकस्याद्दानकपालाद्यभावतः।स्याद्यक्रइत्यदेवत्वप्रयाजक्रच्यसंभवतः।अग्नीषोमीयपशावैष्टिको विधीतोनास्तिकृतःपूर्ववदत्रनिर्वापकपादिलिंगाभावादितिचेत्।मैवं।आग्नेयमष्टाकपालमित्यत्रोत्पत्तिवाक्येयद्याइत्यदेवतेत्यक्रतेर्थाग्नीषोमीयंपशुमित्यत्रापिनन्वसोमेनयजेतेत्यत्रेवदेवतायाश्रवक्रत्वंतरेणद्यक्रइत्यदेवतत्वमेकंलिंगं।एकादशप्रयाजानजनीतिप्रयाजवत्वंद्वितीयंक्रच्यर्म द्याद्यर्जुद्वापशुमनक्तीतिआद्यारंजनेलिंगांतरे।आलंभोलिंगांतरंदृष्टावपीषामालभतइतिवदर्शनात्।तस्मादस्तिपशावैष्टिकः॥षष्ठः॥सवनीयादिकेराशीदेर्कोवाप्रकृतित्वनः।आद्योंत्योलिंगतोन्यत्रविकृतिःप्रकृतिर्भवेत्।सवनीयानुबंध्यनिरूढादिपशुश्चदर्शपूर्णमाससंबंधीविधीतः।अतोदर्शस्यप्रकृतित्वात्दैक्षोग्नीषोमीयपशुविधीतःदीक्षतेनानुष्ठेयेषुपशुविधीतेषुप्रयमभावित्वात्तस्यवाग्नीषोमीयस्येष्टिविकृतित्वमस्तिअतोनतस्यविधीतोनिदेशार्हइतिप्राप्तेरुच्यमः।आलंभोग्नीषोमीयपशोलिंगंतच्चसवनीयादिष्वस्तितथाप्रातःसवनादिषुवपादिप्रधारोपरंलिंगं।इष्टिंप्रतिविकृतेरप्यन्यत्रसवनीयादौप्रकृतित्वेनविरुध्यतेतस्मादग्नीषोमीयपशोर्विधीतंसवनीयादिपशुप्रतिदिशेत्॥सप्तमं॥स्यादेका

दशिनेदेक्षादर्शोत्पादाद्योरुक्तइत्यवत्।दर्शनाद्दपसोत्पत्तविशेषाल्लिंगतोनिमः।एकादशिनाःपशव आ
म्नायंतेआग्नेयःकृष्णग्रीवःसारस्वतीमेषीवभ्रुःसौम्यःपौष्णःशामःशितिपृष्ठोबार्हस्पत्यःशितिपादोवैश्वदेव
ऐंद्रोरुणोमारुतःकल्माषऐंद्राग्नःसंहितोधोरामःसावित्रोवारुणः पे त्वइतियद्यप्यष्ट
मेधप्रकरणेएतेपठिताःतथापिज्योतिष्टोमप्रकरणेप्येतेविधीयंते पैवग्नेयेनवापयतिमिथुनंसा
रस्वत्याकरोतिरेतःसोम्येनदधातिपुष्टिमेनयतिपौष्णेनेत्यादिनातेषैकादशिनेषुदैक्षादग्नीषोमीयाद्विध्यंतस्यातिदेशःस्यात्।ऋतुःअग्नीषोमीयस्यपशुप्रकृतित्वेनइर्वाधिकरणेनिर्णितत्वादितिचेत्।
मैवं।सोत्पत्तविशेषलिंगदर्शनात्सुत्याकालिभवःसोत्यःसवनीपशुस्तत्रोदकप्रान्नारशनेकावादने कीद्वितीयाएतद्वृत्तीयेनिर्णीतंतेनेदृशनाद्दयमग्नीषोमीयपशावसंभवात्सवनीयस्यविशेषलिंगमेकंसुत्याकालीनत्वंद्वितीयंतेचद्वेलिंगेएकादशिनेषुदृश्येतेतत्रेदमाम्नायतेद्वेदृशनेआरायद्दाभ्यांद्वाभ्यांरशनाभ्यामेकेकंरूपंपरिव्ययतीतिसुत्याकालत्वंवतेष्वस्तितनःसोत्यधर्मानिदेशः॥अष्टमं॥लला
साद्गिणेदैक्षादैकादशिननोथवा।आद्योविशेषराहित्यान्नगण त्वविशेषतः।काम्यपशुकाउपशुगणः

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

क्रियतेवसंतेललामांश्रीनवृषभानालभेतेतिंतत्रश्रानाद्यादिविशेषलिंगाभावात्रैकादशीषोमीयाहर्मा
निर्देशाइतिचेत्न।गणत्वेनविशेषलिंगेनैकादशिनेभ्योतिदेशात्एकादशिनानांपशुगणप्रकृतित्वंलिंगाद
वगम्यते।तथाहिसोत्रामण्यांपशुगणंप्रकृत्येवमाम्नायतेयत्रिषुपशुषेषालभेतबहिर्द्धास्याइंद्रियंवीर्यंदधा
त्यात्मानमस्मैजनयेदेकरूपमालभतइतियद्यग्नीषोमीयःप्रकृतिःस्यात्तदावोदकस्पेवरूपस्यप्राप्तत्वे का २८
नरूपपंचत्वप्रसक्त्यभावात्तउपन्यासेनदोषाभिधानंपुनरेकरूपविधानंचव्यर्थंस्यात्।एकादशिनानांप्रकृ
१ त्तित्वेउप्रतिपशुष्टथग्रूपातिदेशेनप्रसक्तिसद्भावाउपपद्यतेतस्मात्पशुगणेषेकादशिनेभ्योतिदेशः।।न
वम।।इष्टेःसोमस्यवाधर्मोविश्वजित्सुविष्टुत्।।वैविशेषादेष्टिकाःस्युःसोमस्याव्यक्तिसाम्यतः।।वि
श्वजितायजेताभिजितायजेत द्वादशाहेनयजेतेत्यादिषुनियामकाभावादिष्टिसोमयोरन्यतरस्यध
र्माइच्छयाग्रहीतव्याइतिचेत्।मैवं।अव्यक्तिलिंगेनसोमसाम्यात्।उत्पत्तिवाक्येरेवतानभिधानमव्यक्तिः
तस्मात्सोमस्यधर्मानतिदिशेत्।। दशम।।अहर्गणेषुसोमस्यद्वादशाहस्यवायिमः।।पूर्ववद्दिनसंख्यादि राम
विशेषैरंतिमोभवेत्।द्विरात्रमारभ्यशतरात्रपर्यंतेषुगवामयनेचपूर्ववदव्यक्तलिंगेनसोमस्यध ३

र्माइतिचेत्।न।विशेषलिंगसद्भावात्।द्वादशाहपर्यंतगतोहःशब्दःपृष्ठ्यषडहात्मैदिनपरःद्विरात्रादिपर्यंत का १
र्गतोरात्रिशब्दश्चतादृशः।एतदेकंविशेषलिंगमस्तिद्वितीयंद्वादशदीक्षास्तृतीयंतद्वद्गवामयनेविद्यतेत
त्र्यभीधनेरीक्षाभिरित्यक्षादीक्षासुम्मानिषडुपन्यस्तानिद्वाभ्यांत्वोमावद्यनिद्वाभ्यांत्वचंद्वाभ्यामस्रक्कृद्वा
भ्यांमांसं द्वाभ्यामस्थिद्वाभ्यांमज्जानंइतितस्मादहर्गणेषुद्वादशाहस्यधर्माः।। एदश।।द्वादशाहस्यग
व्यस्यवादित्याद्यंकितायने।उरेवाद्योगव्यधर्मावत्सरत्वादिलिंगतः।आदित्यानमयनंतपस्विनामयन
मित्यादिषहर्गणत्वादिलिंगेनद्वादशाहस्यधर्माइतिचेत्।न।गव्यलिंगस्यविशेषत्वात्।गवांसंबंधिगव्यं
गवामयनमितियावत्तत्स्यधर्माएतेषुगाद्याःकृतःसंवत्सरसत्रसामान्यात्षष्णुत्रशतत्रयदिवस
साध्यतानियम : सद्भावात्यत्नयउपगायंतीत्येतत्स्तुगवामयनगतमाद्यतिकधर्मस्यदर्शनाद्यत्त
स्माद्भव्यस्यधर्माः।। द्वादश।।साद्यस्कौसोमिकःपूर्वधर्मोवाव्यक्तभावतः।सोमिकःस्यादेकनामैकसंघस्य
त्वेतिनःसाद्यस्काइत्येकनामकाएकसंघवर्तिनोबहवोयागाःश्रुताः।तथासाहस्राइतितस्मिन्साद्यस्क
संघेप्रथमः साद्यस्कोधर्मसंयुक्तःसमाम्नातःएवंसाहस्रेषपितत्रधर्मरहितेद्वितीयादिकेसाद्यस्कैसाहस्रै

अ० ४ यकत्वसाम्यात्सौमिकोधर्मइतिचेत्।मैवं।एकनामत्वेकसंघवर्त्तित्वाभ्यांविशेषलिंगाभ्यांप्रथमसाद्यस्कप्रथम
साहस्रधर्मस्येवोद्वितत्वात्।।बर्हिर्दृशा।।फलंवनियमःकर्त्तासंघःसौर्येनवाग्निमः।प्रयाजवन्नविधादिविधंत्र
त्वविभेतः।दृष्टेफलादयःचत्वारःसंतिफलंस्वर्गः।नियमोयावज्जीवकर्त्तव्यकर्त्तास्वर्गकामःसंध्याग्नेयादीनां
षण्मासाहित्यंतएतेचत्वारःसौर्येप्रयाजादिवदतिदेष्टव्याइतिचेत्।नैवंषण्मात्।प्रयाजादिराकांक्षितविधंत
त्वादतिदिश्यते।विधादिस्त्वनाकांक्षितःसौर्यंचरुंनिर्वपेदितिमुख्यविधेःप्रत्यक्षश्रवणादन्यथाविधंत्रेपि
कस्याकांक्षावर्णेतंतस्मात्प्रधानकर्मणोनाकांक्षितस्यविकृतावप्रवृत्तेस्तत्संबंधाः फलादयोपनाकांक्षि
तत्वान्नातिदिश्यंते।।चतुर्दृशा।।गोर्हनाद्यस्तिनोवाभवेत्प्रणयनाश्रयात्।अनंगत्वादपेक्षापाश्रभावान्नाति
दिश्यते।चमसेनापःप्रणयेद्गोर्होहनेनपशुकामस्येतिदर्शपूर्णमासयोक्तंगोर्होहनंसौर्येणातिदेष्टव्यंकु
तःस्तराश्रयस्यप्रणयनस्यसद्भावादितिचेत्।मैवं।कर्त्तृगतभावमसएवप्रणयनमपेक्षितंनत्वंगंपुरु
षार्थंगोर्होहनंश्रुतःफलनियमादिवन्नातिदेशः।।पंचदृशा।।स्पर्शेदृयंव्यवस्थाप्यंविकल्प्यंवाव्यवस्थितिः
प्रकृताविवतोतत्रतस्याःशास्त्रवर्ज्यनात्।दर्शपूर्णमासयोर्हविषांस्पर्शेनदृयंव्यवस्थितमंत्रदृयसाध्यमा

सायण ३
राम ४

न ३

ज्ञातंचतुर्होत्रापौर्णमासीमभिमृशेत्पंचहोत्रामावास्यामितिष्टथिवीहोतेत्यादिमंत्रश्चतुर्होतारंअग्निर्होतेत्यादिमंत्र
पंचहोतारंतेनउभयंसौर्यादौवोदकःप्राप्तंसत्कालभेदेनानुष्ठानदृयेव्यवस्थापनीयंकृतःप्रकृतौपौर्णमास्य
मावास्ययोःकालयो र्भेदेनव्यवस्थितत्वादितिचेत्।नाप्रकृतौनदृव्यवस्थापाश्रार्थिकत्वात्।शास्त्रेपेवांगत्वेनाति
देशार्हत्वात्तस्माउभयंविकृताविछयाविकल्प्यते।।षोडशा।।षट्कपालस्याप्यताग्नेयस्येवसौर्येग्नेमतः।अवि
शेषोनदेवैक्यादोषदृव्यकत्वंदर्शपूर्णमा सगतेषुषड्युगेषुयस्यकस्यापिविधंतःसौर्यकर्तव्यःस्येवे
तिविशेषनियामकस्याभावादितिचेत्।नादेवतैक्यस्यनियामकत्वात्सौर्यशरुगृहितप्रत्ययविग्रहस्यमुख्यो
विनिद्दिववनेनापिकर्तुंशक्यत्वात्।देवतैक्यमनिश्चितमितिचेत्।ना।विधिशेषार्थवादेक्यवमुमेवादित्यमित्ये
कवचनेनतदपदेशादाग्नेयार्थवादेपिसोग्नयेध्रियतेत्येकवचनंव्यपदिष्टंअतआग्नेयस्येवविधंतोनत्वग्नीषोमी
यैंशाग्नयोः।यद्यपैंद्र्योरध्रिपयसोःप्राजापत्योपांशुयाजेपिदेवतैक्यमस्तितथाप्योषधदृव्यकत्वंआग्नेयेविध

न ३

नेनास्मात्तस्येवविधंतः।।सप्तदशा।।देवोबलीहविर्वैंद्रपुराडाशोग्नेयोयतः।देवोमुख्योतरंगंतद्धविःकर्मणप
तीवती।ऐंद्रमेकादशकपालंनिर्वपेदित्यत्रदेव साम्येनसाम्नाय्यधर्मःप्राप्नोतिहविःसाम्येनपुरोडाशधर्माः।

तं १

अ० ५ तत्रदेवोबलीकृतोमुख्यत्वात्तत्रप्राथमिकेनपदेनोच्यमानत्वात्प्रादिपदिकार्थत्वाच्च द्रष्टव्योहविस्कृद्वितीये
नपदेनोच्यतेतराप्येकादश कपालेषुसंस्कृतइत्यस्मिन्नर्थेविहितस्यप्रत्ययस्यार्थः।अतोमुख्यत्वाद्देवतासा
मान्यंप्रबलमितिप्राप्तेब्रूमः।त्यज्यमानतयात्यागरूपेकर्मणिहविःप्रत्यासन्नंदेवतानुमानसेवोद्दिश्यमान
त्वाद्यागक्रियांबहिरंगंयत्तुमुख्यत्वमुक्तंतच्चौपाधिकंनतुस्वाभाविकंतस्मात्स्वाभाविकेनातरंगत्वेनहविः
सामान्यस्यप्रबलत्वात्पुरोडाशस्यधर्मःकार्यइतिएवमाग्नेयंपयइत्यत्रसाऩ्नाय्यधर्मोद्रष्टव्यः॥ अष्टादशः
॥कृष्णलेषुघृतस्योत्तप्तेहस्तेजोसुतेभवेत्।घृतस्यभेवंवेशद्याद्वरुशद्दसुतेस्त्रियाःप्राजापत्यंघृतेचरुंनिर्व
पेच्चतकृष्णलमासुष्कामइत्यत्रकृष्णलेषुउपांशुयाजइर्व्यंघृतस्यधर्माकर्तव्याःकृष्णलाख्यसुवर्णस्यघृतस्य स्म ५
वतेजस्वित्वसाम्यादितिचेत्।मैवं।सुवर्णशकलन्नीत्रीवैशद्यसाम्यान्नहिघृतस्यप्रवलकाठिन्यविरलत्वादि
रूपंवैशद्यमस्ति।वरुशद्दश्चौषद्यंविषयःकृष्णलेषुप्रयुज्यमानश्चौषद्यधर्मान्प्रापयतीति न स्माद्दीर्घधर्माःक
र्तव्याः ॥क्षीरस्याज्यस्यवानीरेमधुन्यग्नेयतः।इत्वंनघृतेग्नेयस्यसत्वाद्वर्णावसंभवात्।चित्रायां राम
गोक्रूयतेदधिमधुहृतमापोधानास्तंडुलास्तन्संसृष्टंप्राजापत्यमितितत्रमधुसुरकेचइत्वसाम्येनसान्ना ५

१९ को नाविंशः।

ग्यगत्तस्यपयसोधर्माइतिचेत्।नाघृतेग्निसंपर्केणइत्वसद्भावादशुक्लवर्णत्वाद्राज्यधर्माणामुत्पवनादीनां
संभवात्पयोधर्माणांदोहनादीनामसंभवाच्चोपांशुयाजगतस्याज्यस्यधर्माःकर्तव्याः॥श्रीमाधवीपेष्टमस्या इति २
ध्यायस्यप्रथमःपादः।द्वितीयेप्रथमं॥सुरावाजिनयोःसोमस्येष्टिर्वासोमशब्दतः।आद्योमैवंहविस्साम्या
त्सोमशब्दप्रशस्तयेसोत्रामण्यांसुरायहाःश्रुताःआश्विनंगृह्यतीत्यादिना।वातुर्मास्येषुवाजिनयागः क्व
तःवाजिभ्योवाजिनंइतितत्रोभयत्रसोमस्यविधंतःकार्यः।क्रतुःसोमोवैवाजिनंसुरासोमइतिवाजिने
सुरायांसोमशब्दप्रयोगात्।सोमशब्दश्चाग्निहोत्रशब्दवद्धर्मानतिदिशतीतिचेत्।मैवंऐष्टिकहविःसाम्या
न्नौषधविकृतिःसुरासान्नाय्यविकृतंवाजिनंतस्मादैष्टिकोविधंतःसोमशब्दस्त्वर्थवादगतत्वेनाग्निहोत्रा
दिनामवदतिदेशकंपदिवाजिनस्यप्रतिपत्तिकर्मत्वान्नास्तिधर्मापेक्षातहितस्मिन्नंशेकृत्वाविंतास्क्तं॥द्वि
तीयं॥पुरोडाशस्यसान्नाय्यस्यवाधर्माःपशोर्यतःद्विवैकपाद्यस्तस्मान्नोत्पविजन्मादिसाम्यतः।अग्नी
षोमीयेपशावग्नीषोमीयपुरोडाशधर्मःकार्यःक्रतोर्देवतेक्यादितिचेत्।मैवं।सान्नाय्यंपशोरुत्पन्नंपशुर
पिपशोरुत्पन्नः।अपणार्थमुदासान्नाय्यपरोक्षःसमाहविःसाम्यं बलीयइत्यक्रीतस्मात्सान्नाय्यस्यधर्माः

॥तृतीयः॥दध्नोत्रपयसोवायोर्घनत्वस्यसमत्वतः।इत्वासन्निकालेभ्योधर्मःस्यात्यशसःपशौ।।तत्राप्यधर्मव
त्यस्मिन्पशौद्रव्यनत्वेनदध्नोधर्मइतिचेत्।मैवं।इवतिगच्छतीतिश्वत्वंपशावस्तिपयसिवर्तद्दध्नेवत्यासन्नंवप
यःसाक्षात्यशुप्रभवत्वात्तदधितुपयसाव्यवहितंएकाहकालीनेवपशुपयसीह्यवहकालीनंदधितस्मात्त
शोपयसोधर्मःकार्यः॥चतुर्थी॥द्वयोर्द्रव्योर्यत्रापयसश्रामिक्षायांद्विजन्वतःद्वयोर्द्रव्योर्द्रव्यनत्वेनप्राधान्यात्यप
सो भवेत्।तत्रेपयसिदध्यानयतिसावैश्वदेव्यामिक्षेतिश्रुतायामामिक्षायांसान्नाय्यगतपोर्दधिप
यसोधर्मःकार्यःश्रुतःश्रामिक्षायाउभयजन्यत्वादित्येकःपक्षः।घनत्वसाम्यस्याधिक्याद्दधिधर्मइतिद्वि
यःपक्षः।पयस्यामिक्षामुन्नयतिपित्संहकारित्वेनदध्यानीयतेतनःपयसएवमुख्यकारणत्वान्नदधर्मएवना
यः॥पंचमी॥अहीनसत्रयोर्द्वादशाहंगोनव्यवस्थितौ।व्यवस्थितौवाविशेषाद्याद्योन्त्यःस्वस्वलिंगतः।प्राय
णीयोतिरात्रःषष्ठःषडहःत्रयःस्तोमाःसविवाक्यमहःउदयनीयोतिरात्रइत्येवमहर्गणोद्वादशाहः।सव
याज्ञिकप्रसिद्धाद्विविधःसत्रमहीनश्चेतिसंज्ञाव्यवस्थयाद्वयोर्धर्मीम्नातोएकोद्वौबहवोवाहीनेनयजेरन्
नदीक्षिताःयाजयेयुर्गृहपतिसप्तदशाःस्वयमृत्विजोब्राह्मणाःसत्रमुपेयुरित्यादयः।ततोद्विविधोद्वादशाह

राम ६

स्यविध्यंतोद्वादशाहश्चाहर्गणानांप्रकृतिरित्यकोग्रहर्गणाश्चद्विविधाद्विरात्रात्यएकादशरात्रांताग्रहीना
त्रयोदशरात्रादीनिचसत्राणितत्राहीनसत्रयोर्द्वादशाहविध्यंतावव्यवस्थयाप्राकृतःकृतःव्यवस्थापकवि
शेषाभावादितिचेत्।मैवंतत्रलिंगस्यव्यवस्थापकत्वात्।आसीरन्प्रेयुरितिचोदनाद्ययजमानबहुत्वनि य ३
यमऋत्विग्यजमानैकत्वसत्रलिंगंयजतिचोदनायजमानबहुत्वविकल्पऋत्विग्यजमानभेदश्चाहीनलिं
गंएतद्वादशमाध्यायएवविचारयिष्यामः।अहीनसत्रयोर्लक्ष्मभेदोनास्त्यस्तिवानहि।आहत्रिसाम्पारा
स्यार्द्विज्यादिभ्यांतयोर्भिदेतिएतल्लिंगद्वयंद्वादशाहेश्रूयतेद्वादश हेनप्रजाकामंयाजयेदितिद्वादशाह ६ य
स्मृद्धिकामाउपेयुरितिद्वादशाहस्मृद्धिकामाआसीरन्नितिचद्विरात्रादिषुयजतिचोदनैव।द्विरात्रेणायजेतेत्या
दित्रयोदशरात्रादिषुसत्रलिंगमेववत्रयोदशरात्रस्मृद्धिकामाउपेयुरितिचउर्दशरात्रंप्रतिष्ठाकामाआसीर
न्नितिचैतस्माद्यथालिंगंधर्मव्यवस्था॥षष्ठेकिंपंचदशरात्रस्यकुउपाय्ययनस्यवा।अहीनत्वंसत्रतावाति
रात्रैकत्वतोग्निमः।उपायिलिंगतःसत्रेप्रबलंविधिवाक्यगंसूत्रान्तरेभ्योहीनत्वलिंगेनैतत्प्रशस्यते।पंचद
शरात्रएवंविधिः।त्रिहदग्निष्टुदग्निष्टोमस्त्रिरात्रोदशरात्रउदयनीयोतिरात्रइतिकुंउपायिनामयनस्योप

क्रमेमाज्याग्निहोत्रंसवसानेदशरात्रोमहाव्रतमुदयनीयोतिरात्रइतितपोरूपंवतिरात्रोनास्तिसंतेनउविद्य
तेतदिदमन्यतरतोतिरात्रत्वमहीनलिंगंसंप्रतिपन्नाहीनेषुनदृशीनात्।श्रुतिश्चभवतियदन्यतरतोतिरात्रमे
नाहीनइतितस्मात्सत्रलिंगस्योभयतोतिरात्रस्याभावादहीनलिंगसद्भावाद्वतयोरहीनत्वमितिचेत्।मैवं।
उपायिवोदनारूपस्यसत्रलिंगस्यदर्शनात्।सत्रेयज्ञेयंकामयेतेतएनंपंचदशरात्रमुपेयुरितिकुंड
पायिनाम यज्ञेपिभूतिकामाउपेयुरिति।इदंचलिंगविधिवाक्यगतत्वात्प्रबलं।यत्तुपंचदशरात्रेसलिं
गाश्रुतिरुदाहृतानयासत्रांतरेभ्योधिकत्वेनप्रशस्यते।इतराणिकेवलसत्राण्येवपंचविंशरात्रस्तुस्वरूपे
णसत्ररूपोऽपिज्योतिरात्रसलिंगेनाहीनइत्यपिव्यवहारमर्हतीतितस्मात्सत्रेएतेउभेतयोःसत्रधर्मानेव
निदिशेत्।इतिमाधवीयेजैमिनिन्यायमालाविस्तरेसप्तमस्याध्यायस्यद्वितीयःपादः॥द्वितीयेप्रथमः॥
आग्नावैष्णवआग्नेयविकृतिःशुचिरेवकः।अग्नीषोमीयविकृतिरथवा व्यत्ययोद्वयोः।प्रथमत्वद्वितीयत्वसा
म्पादाद्योनिमोभवेत्।द्विदेवत्वैकदेवत्वसाम्यस्यश्रुतिमत्वतः।हविर्गणःकश्चिदूह्यतेआग्नावैष्णवमेकादश
कपालंनिर्वपेत्स्वरस्वत्येरूपंवाहस्पत्यंपवस्वमितिगणान्तरेवैवमाम्नायतेसग्नयेपवमानायाग्नेयंपाव

कायाग्नयेशुचयेशकपालमितिसआग्नावैष्णवस्यप्रथमस्थानत्वाद्याग्नेयविकृतित्वंयुक्तंशुचिरेवकस्यद्वि
यस्थानत्वादग्नीषोमीयविकृतित्वमितिचेत्।न।द्विदेवत्वादिसाम्यस्यश्रूयमाणत्वेनार्थसिद्धस्थानतोब
लीयस्त्वात्तस्माद्याग्नावैष्णवोग्नीषोमीयविकृतिःशुचिरेवकआग्नेयविकृतिः।द्वितीयाद्विहत्यस्वादिमस्यद्वा
शाहस्यवाग्निमः।शाद्यद्विहत्वतोत्पत्तेरहःसंख्यानुसारतः।जनकसप्तरात्रेश्रूयते।चत्वारिद्विहत्यहानिअ
ग्निष्टोममुखानीति।तत्रत्रिवृत्स्तोमविशिष्टंयत्प्रथममहस्तस्यविधंतउत्तरेषुत्रिवृद्धःशुकर्तव्यःपूर्वन्यायेन
शाहस्यत्रिवृत्वसामान्यस्यविद्यमानत्वादितिचेत्।मैवंतरानीमेकस्मेवाहश्चतुराहत्याचत्वार्यहानिन सि
ध्येयुः।किंचाग्निष्टोममुखानीत्याद्यस्मैकस्मैवाग्निष्टोमत्वंविधीयतेत्वत्पक्षेतरेषामपित्र्याणामग्निष्टोमत्वा
न्मुखशब्दोनोपपद्येतेततोद्वादशाहस्यविधंतोद्याद्यःद्वादशाहेषष्ठेषडहे त्रिवृत्पंचदशःसप्तदशएकविंशइत्ये
षावर्णामक्रमःपरस्परविलक्षणानांसंघत्वयोग्यानांविधंतेसतिनोक्तरीत्यहर्गणेनन्वपंचदशादीनां
त्रिवृत्वमनुक्रमितिचेत्।न।वचनेस्तोममात्रबाधात्।तद्यतिरिक्तस्तुविधंतोनिदेष्टव्यः॥तृतीयाधिकर
णमारचयति॥चत्वारंषडहाद्वादशाहस्यषडहस्यवा।चतुर्विंशतिसंख्यार्थमाद्योषडहश्रुतेः।षड्विंशाहेश्रूयते।

अ० ८

षडहाभवंतिचत्वारोभवंतीतिचतुर्हःसंज्ञकानांसोमयागानांसंख्याविशेषःषडहपदोत्तर्गतेनषट्शब्देना
धीयतेसावषट्संख्याउनःचतुःसंख्यापरिशिष्यमाणावतुर्विंशतिसंख्याकानामहांसंघेपर्यवस्यति।अहःस
ङ्घस्यचप्रकृतिर्दशाहः।अतस्तद्विगस्यसंघत्वस्यदर्शनात्रस्येवविधंतःप्रवर्तनीयदिसङ्ख्यत्यावतुर्विंश
तिसंख्यानङ्गर्पनतर्हियावत्यूर्विसोभस्यतामितिप्राप्तेब्रूमः।षड्विरहोभिर्निर्ह्याद्यःकर्मविशेषःषडशाहवाच
स्तेचकर्मविशेषाश्चत्वारस्तथासतिचतुर्विंशतिसंख्योनात्रशाहः।ततःशाहस्यषडहनामकस्यकर्मविशेषस्य
विधंतोन्यायप्राप्तिविलक्षणाषडहाश्चत्वारोनस्फःतेर्यकएववतुरभ्यतोत्वत्यत्तेपिदशाहोभ्यस्यतेतस्मा
त्षडहत्वलिंगात्रस्येवविधंतः।।चतुर्थः।।शतोक्थ्योज्योतिषोयदहादशाहस्यनामतः।आद्यःसमाप्तिना
मेतत्संबत्वारंतिमोभवेत्।शतोक्थंभवतिशतातिरात्रंभवतिपंचाग्निष्टोमःपंचोक्थाःइत्यादयःसूत्र्यं
तेतिषुज्योतिष्टोमस्यविधंतःकार्यःऋतःउक्थ्योषोडशपतिरात्रोग्निष्टोमइत्यादीनांज्योतिष्टोमनामत्वा
दितिचेत्।मैवंउक्थ्यादीनिस्तोत्राणितथासतियस्यकर्मणःसमाप्तिर्येनस्तोत्रेणक्रियतेतस्मिंस्तत्कर्माणि
संस्थानिमित्तकउक्थादिशब्दोवर्तते।ततोद्वादशाहगतेषडहःसउक्थ्यादीनामसंभवात्संबत्वलिंगेनद्वाद

अ० ८ अ० ५ सदृ शेष उक्थ्य राम ८

शाहस्यविधंतोभवतितत्रायंतेप्रायणीयोदयनीयौवर्जयित्वामध्यवर्त्तिनोदशरात्रस्यविधंतोद्विरात्रादि
विकृतिष्वतिदेष्टव्यइतिदशमाध्यायेवक्ष्यते।तथासतिदशरात्रेदशकृत्वोभ्यस्यमानःप्रत्यहंउक्थस्तोत्रेण
समानेशस्तोक्थ्यनामतामापद्यतेएवमितरत्रापियोज्यं।पंचमाशतोक्थाद्यास्तोत्रद्विर्गुणादेकादशतोथवा।
आद्योगुणविकारत्वादंत्योत्रस्तोत्रजन्मतः।इत्यादिदाहृतेशतोक्थ्यशतातिरात्रेचद्विरपेक्षिता।तथाहि।ज्योतिष्टो
मःसप्तसंस्थः।तत्राग्निष्टोमःप्रथमसंस्थातत्रद्वादशस्तोत्राणि।प्रातःसवनेबहिष्पवमानस्तोत्रमेकंवृद्धा
र्भाज्यस्तोत्राणिमाध्यंदिनसवनेमाध्यंदिनःपवमानःएकंस्तोत्रंचत्वारिषष्ठस्तोत्राणितृतीयसवनेआर्भव
पवमानएकंस्तोत्रंयज्ञायज्ञियसामसाध्यमग्निष्टोमस्तोत्रमपरंतेनस्तोत्रेणायंप्रकृतिरूपोयज्ञःसंति
ष्ठतेतद्विकृतिषुप्रथमायामग्निष्टोमस्तोत्राद्ध्वंत्रीण्युक्थ्यस्तोत्राणिभवंतितैःसाविकृतिःसंतिष्ठते।ततोर्ध्व
मोडशिनस्तोत्रेणान्याविकृतिःसंतिष्ठतेएवंविकृत्यंतरेष्वपिद्रष्टव्यंतस्मात्समाप्तिनिमित्तान्यग्निष्टोमोक्थ्य
षोडश्यतिरात्रादिनामानि।एतदेवोपजीव्यर्त्वधिकरणेद्वादशाहगतानामप्युक्थ्यादिनाम संभवा
न्नदीयशरात्रविधंतःशतोक्थ्यादिनिर्दिष्टंतस्यदशरात्रस्याद्यंतोद्वावग्निष्टोमौतथासतिदशकृत्वा

अ० ८ ३ प्रमा स्तो ४ १ २

स्तदभ्यासे विंशतिरग्निष्टोमाः संपद्यंते तेषामुक्थ्यत्वं संपादयितुं प्रत्यग्निष्टोममुक्थ्यनामकं स्तोत्रं वर्धनीयं अन्यथाशतोक्थ्यत्वं न स्यात् किंत्वशीत्फक्थ्यत्वमेव स्यात् एवं शतानि रात्रेपि प्रत्यहमतिरात्रत्वप्रयोजकं स्तोत्रं वर्धनीयं तत्र गणत्वेन हादशाह विकरत्वात्तदीयस्तोत्रानिर्देशइति प्राप्ते क्रमः उक्थ्यादिस्तोत्राणि एकाहेज्योतिष्टोमउत्पन्नानि तस्मादेकाह। द्यथाद्वादशाहेति निर्दिश्यते तेन यथाशतोक्थ्येपि एकाहादेवेति निर्दिश्यते अन्यथाभिक्रुकोभिक्रुकांतरान्निष्क्रमत इति न्यायस्यापत्तेः यावत्तिर्देशपरंपरानुवर्तते तत्रतत्रोदाहृतानुसर्वत्र प्रबलेनिर्गमेषु पन्यस्तं इहतु गणत्वमहर्गतेनतु सोत्रगतं तस्मादादशाहीयस्तोत्रगतान् विशेषानुपेक्ष्य तद्विशेषरहितानि स्तोत्राणि ज्योतिष्टोमादतिदिष्टानि॥ षष्ठ॥ अहर्गीयत्रिमित्यत्रवर्णलोपः अथवा आद्यः संख्याक्रतोर्भेदं गयादीनत्र संगतः। वाजपेयेनेष्वाहबृहस्पतिसवेनयजेतेति श्रुतं तत्रेदमपरमाम्नातं गापत्रमेतद्दर्भवतीति। तस्मिन्नेकाहेबृहस्पतिसवेप्रकृतिभूतात्ज्योष्टोमान्नानाछंदांसि त्रिष्टुबादीन्यतिदिष्टानि तेषधिकाक्षराणि विनोप्यचतुर्विंशत्यक्षराणि परिशेष्यगायत्रीत्वं संपादनीयं कुतः चतुर्विंशत्यक्षरागायत्रीत्यक्षरसंख्यायास्तच्छब्दप्रवृत्तिनिमित्तत्वश्रवणादिति चेत्। मैवं। अतिप्रसंगात्कविभिर्निर्मि

तेगद्येतत्रदेशीयभाषासुवतर्योक्षरसंख्यागायत्रीत्वंकेनवार्येत। तस्मादाशतयासुत्पन्नासुचतुर्विंशत्यक्षरास्वक्षरवर्तमानःकश्चिद्गवांत्वरजातिविशेषस्तत्प्रवृत्तिनिमित्तं। तस्मात्रासाम्ववामागमःकर्तव्यः॥ ॥इतिमाधवीयेजैमिनिन्यायमालाविस्तारेसप्तमस्यतृतीयःपादः॥ ॥चतुर्थपादेप्रथमाधिकरणे नामवागुणोदधिहोमवत्तागुणा मे ३
संभवतोलोकवेदयोर्नामतद्वेत्। इदमाम्नायतेयदेकयाजुह्वादर्विहोमंकुर्यादिति। तत्रदर्वीहोमोदर्विहोमइति। तृतीयासमासेसतिदर्व्याजुहोतीत्यादाविवहोमानुवादेनगुणविधित्वसंभवादर्व्याख्योगुणोविधीयतइतिचेत्। मैवं। नतावल्लोकसिद्धेस्थालीपाकाष्टकादिहोमेदर्विगुणोविधातुंशक्यः। लौकिकशिष्टाचारादेवतत्रसाधनप्राप्तेः। नापिवेदसिद्धेरग्निहोत्रनारिष्टादिहोमेतत्रविहितजुह्वादिबाधप्रसंगात्। तस्मादर्विहोमइतिनामधेयं। द्वितीयाधि॥ कर्मणि
लौकिकस्यातसर्वस्यनाम्नोबहुवाक्यतः। नमित्रसाम्नादेरेपितुक्रेःसर्वनामतत्रसंबंधात्॥ दर्विहोमि
कोब्राह्मणइतिस्मृतावंबष्ठस्वामिकेस्मार्तहोमेतत्प्रयोगात्। लौकिकस्येवहोमस्यतन्नामेतिचेत्। मैवं। दर्व्याहो
मोदर्विहोमइतिप्रवृत्तिनिमित्तस्यलौकिकवैदिकयोःसमानत्वादर्विहोमंकुर्यादितिश्रुत्युक्तैर्वैदिकहोमना
मलिंगत्वाच्चसर्वस्येवहोमस्येतन्नाम॥ तृतीयो॥ यजतेरपिनामास्या हुहोतेरेववाग्निमः। अविशेषेणमुख्य

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

त्वाज्जुहोतेर्लक्षणान्यथा।तन्नामजुहोतिवोदनानांयजतिवोदनानांचभवितुमर्हतिकृतः।विशेषाश्रवणाद्
नित्येत्।मैवं।जुहोतिवोदनासुहोमशब्दस्यमुख्यत्वात्यजतिवोदनानांतन्नामत्वेलक्षणास्यात्तस्माज्जुहोति
वोदनानामा।चतुर्थ।।दर्विहोमेसोमधर्माश्रुर्वत्वसुताग्निमः।अव्यक्तेर्यज्यभावाच्चस्वाहोक्तादेरश्रुर्वना।जया
भ्यातानारिष्टारिषुदर्विहोमेषूत्पत्तिवाक्येदेवतायाश्रुश्रवणात्श्रव्यकेलिंगेनसोमधर्माःकर्तव्याइतिवे
त्।मैवं।सोमेक्रतस्ययजतिलिंगस्याभावात्।किंचाएथिवेस्वाहांतरिक्षायस्वाहेतिदर्विहोममंत्रेषुस्वा
हाकारश्रुत्याःसर्वसोमविधंतानिदेशोविरुध्येतत्तेनस्वाहाकारविरोधिनोवषट्कारस्यप्राप्यमाणत्वात्
।किंवोदाहृतैर्मंत्रगतवचुर्थ्यंतैःपरैर्देवतासमर्पणात्नास्त्यव्यक्तत्वंतस्माद्दर्विहोमानामश्रुर्वकर्मत्वान्नास्तित
त्रकस्यापिविधंतस्यानिदेशः।। ।।इतिश्रीमाधवीयेजैमिनीन्यायमालाविस्तारेश्रुष्टमस्याध्यायस्यचतु
र्थपादः।। ।।समाप्तः।। ।। ।। ।। ।। ।। ।। ।। ।। ।।